Saka, Ram
Maha Shivratri Katha; 1938, Sanwat - 1940

(Handwritten)

23984.

श्रीगणेशाय नमः अथ महाशिवरात्रिकथा प्रारभ्यते श्रीउमामहेश्वराभ्यां नमः

श्रीसूत उवाच ॥ कैलास शिखरासीनं देवदेवं जगद्गुरुम् ॥ पंचवक्त्रं दशभुजं त्रिनेत्रं शूलपाणिनम् ॥१॥ तं दृष्ट्वा देवदेवेशं प्रहस्योत्फुल्ललोचन-
म् ॥ पार्वती परिपप्रच्छ विनयावनता स्थिता ॥२॥ पार्वत्युवाच ॥ श्रुतास्त्वयोक्ता देवेशव्रतानां निर्णयाःशुभाः ॥ नास्ति मे निश्चयो देव भ्रान्ताऽहंच पुनः
पुनः ॥३॥ तस्माद्वदस्व मे देव ह्येकं निःसंशयंव्रतम् ॥ व्रतानामुत्तमं देव भुक्तिमुक्ति प्रदायकम् ॥४॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्षामि व्रतानामुत्त-
मं व्रतम् ॥ यन्न कस्य चिदाख्यातं रहस्यं मुक्तिदायकम् ॥५॥ माघमासे कृष्णपक्षे अमायुक्ता चतुर्दशी ॥ शिवरात्रिस्तु साज्ञेया सर्वयज्ञोत्तमोत्तमा ॥६
॥ शिवरात्रिसमं नास्तिव्रतानामुत्तमंव्रतम् ॥ ज्ञानतोऽज्ञानतो वाऽपि कृत्वा मोक्षमवाप्नुयात् ॥७॥ कश्चिदासीत्पुरा देवि निषादो जीवघातकः ॥ बध्द गो-
धांगुलित्राणः सदैव मृगयारतः ॥८॥ सीमान्ते स सदा तिष्ठन् कुटम्बपरिपालकः ॥ एवंविधो निषादोसौ चतुर्दश्यां दिने शुभे ॥९॥ गृहीत्वा च धनुः पाणौ
दक्षिणे शरमुत्तमम् ॥ निर्गतः सवनं घोरं आमिषेलुब्धमानसः ॥१०॥ वनंच पर्वतान् सर्वान् भ्रमित्वा गिरिकन्दरा ॥ संप्राप्तं तेन नो किंचिन्मृगसूक-
र तित्तिरम् ॥११॥ निराशो लुब्धको यावत्तावदस्तंगतो रविः ॥ चिंतयित्वा जलोपान्ते जागरं जीवघातनम् ॥१२॥ रात्रावपिकरिष्यामि येन मे जीवनं भवेत्
॥ गतो सौ जलसांनिध्यं तत्तीरे जालिमध्यगः ॥१३॥ बिल्ववृक्षो महानासीत् स शाखो विस्तरान्वितः ॥ जालिमध्ये महालिंगं तिष्ठत्येकमनादिकं
॥१४॥ आरुरोह च बिल्वान्तं तथा चात्तशरासनः ॥ त्रोटित्वा बिल्वपत्राणि शस्त्रमार्ग विशोधयन् ॥१५॥ पतितानि ततस्तानि देवलिंगस्य मूर्ध्दनि ॥

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 23784
Date 22.3.68

ततो जलार्थमायाता हरिणी गर्भसंयुता ॥१६॥ कृतं च बाण संधानं तेनैकाग्रेण चेतसा ॥ एतस्मिन्नंतरे दृष्टो हरिण्या लुब्धकस्तदा ॥१७॥ दृष्ट्वा तु तस्य संधानं यम
दंष्ट्रासमप्रभम् ॥ सा मृगी दिव्यया वाचा लुब्धकं वाक्यमब्रवीत् ॥१८॥ **मृग्युवाच** ॥ स्थिरो भव महाव्याध सर्वजीव निकृंतन ॥ कथयस्व महाबाहो किमर्थं मां ह-
निष्यसि ॥१९॥ **लुब्धक उवाच** ॥ समातृकं कुटुम्बं मे क्षुधया पीड्यते भृशं ॥ धनं वै मद्गृहे नास्ति तेन त्वां हन्मि शोभने ॥२०॥ **मृग्युवाच** ॥ शृणु त्वं लुब्धक
श्रेष्ठ कथयामि तवाखिलं ॥ गर्भाक्रान्ता विशेषेण अवध्या चेति निश्चितम् ॥२१॥ कुटुम्बस्य च ते नूनं भोजनं न भविष्यति गर्भं त्यक्त्वा पुनः प्रातर्बालान्सं-
दिश्य बन्धुषु ॥२२॥ शपथैरागमिष्यामि संदिश्य च सखीजनं ॥ तस्यास्तद्वचनं श्रुत्वा व्याधो विस्मयमागतः ॥२३॥ क्षणमेकं तथा स्थित्वा व्याधो वचनमब्रवी-
त् ॥ **व्याध उवाच** ॥ शपथैश्च व्रज त्वं हि यथा मे प्रत्ययो भवेत् ॥२४॥ **मृग्युवाच** ॥ द्विजो भूत्वा तु यो व्याध वेदभ्रष्टोऽभिजायते ॥ तेन पापेन लिप्यामि य-
दि नायामि ते गृहं ॥२५॥ मृतशैय्याप्रतिग्राही माता पित्रोरपोषकः ॥ देवद्रव्यं गुरुद्रव्यं ब्रह्मद्रव्यं हरेत्तु यः ॥ तेन पापेन लिप्यामि यदि नायामि ते गृहं ॥२६॥ दा-
नं दातुं प्रसक्तस्य योंतरायकरो नरः ॥ एकाकी मिष्टमश्नाति भार्यापुत्रविवर्जितः ॥ तेन पापेन लिप्यामि यदि नायामि ते गृहं ॥२७॥ मृगीवाक्यं ततः श्रुत्वा लु-
ब्धको हृष्टमानसः ॥ संहृत्य बाणं संधानान्मुमोच हरिणीं तदा ॥२८॥ द्वितीये प्रहरे प्राप्ते अर्धरात्रे गते सति ॥ तस्मिन्नेव क्षणे देवि परा प्राप्ता मृगी तदा
॥२९॥ संत्रस्ता भयसंविष्टा पतिमन्वेषती मुहुः ॥ जालमध्ये स्थिते नाथ दृष्टा सा लुब्धकेन तु ॥ ३०॥ तस्या वधार्थं तेनाशु बाणो धनुषि संधितः ॥ निरीक्ष्य लु

ब्धको यावत्तस्यां बाणं प्रमुंचति॥ ३१॥ तावन्मृग्यास संदिष्टो दृष्ट्वा तं विव्हला भवत्॥ एवं सुदुःखा हरिणी लुब्धकं वाक्यमब्रवीत्॥ ३२॥ धनुर्धर महाव्याध सर्वे
जीव निकृंतन॥ देहि मे वचनं सौम्यं पश्चात्त्वं मां निपातय॥ ३३॥ तेजोबलं यथा सर्वे निर्दग्धं विरहाग्निना॥ अहं प्राणैर्वियुज्यामि भोजनं न भविष्यति॥ ३४॥ अहं
च दुर्बला नूनं मेद मांस विवर्जिता॥ केवलं पाप भोक्ता हि मम प्राण वियोजकः॥ ३५॥ विधाय चऋतोः शान्तिमागमिष्यामि तेन्तिकं॥ तयोक्तं लुब्धकः श्रुत्वा किं करोमी
ति चिंतयच्च॥ ३६॥ स चिंत्य लुब्धकः प्राह मृगीं शोकातुरां कृशां॥ सत्यं वद महाभागे यथा मे प्रत्ययो भवेत्॥ ३७॥ चक्रे सत्यप्रतिज्ञां च व्याधस्याग्रे पुनः पुनः॥ मृग्युवा
च॥ क्षत्रियस्तु रणं श्रुत्वा संग्रामे यो न गच्छति॥ ३८॥ परद्रव्यरता नित्यं परधर्मापि निंदकाः॥ तेन पापेन० गृहं॥ ३९॥ एतच्छ्रुत्वा तु व्याधेन सापि मुक्ता मृगांग
ना॥ जलं पीत्वा तु बहुशो संचचार यथा गता॥ ४०॥ पीडितो तीव शीतेन क्षुधया गृहचिंतया॥ लुब्धकेनापि दृष्टोसौ हरिणो स्फुरितेक्षणः॥ ४१॥ तं दृष्ट्वा बाणमुद्यम्य आ
कर्ण संनिवेशितं॥ बाणं मुंचति यावच्च तावद्दृष्टो मृगेन हि॥ ४२॥ कालरूपं तु तं दृष्ट्वा मृगश्चिंतितवान्भृशं॥ निश्चयं भविता मृत्युर्गोचरस्य यतो गतः॥ ४३॥
भार्या प्राणसमा मह्यं व्याधेन हि विनाशिता॥ हाहा कालकृतं पापं भार्यां दुःखं समागतं॥ ४४॥ इत्येवं चिंतयित्वा तु लुब्धकं वाक्यमब्रवीत॥ मृग उवाच॥ शृणु
॥४५॥
त्वं लुब्धक मे ह्य आमिषाहार भोजन॥ प्रभाते ते गृहं नूनं आगमिष्यामि निश्चितं॥ भार्या ऋतुमती मेद्य कामार्तास्मि यथा भृशं॥ ४६॥ गृहे गत्वाथ भुक्त्वा

नामापृच्छन् स्वसुहृज्जनम् ॥ स्वेच्छयाऽऽगमिष्यामि गृहं ते नात्र संशयः ॥४७॥ मं देह स्वगृहे नास्मि नेतुं शक्तः कथंचन ॥ लुब्धक उवाच ॥ असत्यं भाष-
से धूर्त प्रतारयसि मां वृथा ॥४८॥ कृत्वा मृत्यु स्थिरं यत्र तत्र गच्छति कोल्पधीः ॥ मृग त्वं शपथान् ब्रूहि विश्वासो मे न विद्यते ॥४९॥ यथा हि प्रेषयामि त्वां स्वगृ-
हं प्रति कामुक ॥ मृग उवाच ॥ भर्तारं वंचते या स्त्री स्वामिनं चैव सेवकः ॥५०॥ मित्रं वंचयते यस्तु गुरुद्रोहं करोति यः ॥ मातापित्रोरभक्तो यो वेदब्रा-
म्हणनिंदकः ॥५१॥ क्रियामुद्दिश्य याचेता कन्या मूल्योपजीवकः ॥ एतेषां पापभोक्ताहं यदि नायामि ते गृहं ॥५२॥ भर्तारमर्थहानं च कुरूपं व्याधिपीडि-
तं ॥ या न पूजयते नारी रूपयौवनगर्विता ॥५३॥ तस्याः पापेन लिप्यामि यदि नायामि ते गृहं ॥ तेन वाक्येन संतुष्टो व्याधो वै गतकिल्बिषः ॥५४॥ संहृत्य
धनुषो बाणं मृगो मुक्तो गृहं प्रति ॥ गतो सौ तेन मार्गेण गतं येन मृगीद्वयं ॥५५॥ लुब्धकेन तदा तत्र जालिमध्ये स्थितेन हि ॥ अथोदिते सूर्यबिंबे अका-
माज्जागरे कृते ॥५६॥ पापान्मुक्तोप्यसौ सद्यः शिवपूजाप्रसादतः ॥ यदा दिशो निरीक्षेत निराशो भोजनं प्रति ॥५७॥ तावच्छिशुवृताऽन्या मृगी तत्र समाग-
ता ॥ दृष्ट्वा मृगीं तदा व्याधो बाणो धनुषि संधितः ॥५८॥ यावन्मुंचत्यसौ बाणं तावदुक्तं तया तदा ॥ मा बाणं मुंच धर्मात्मन् धर्मं पालय सुव्रत ॥५९॥ अहम
वध्या सर्वेषामिति शास्त्रविनिश्चयः ॥ शयानं मिथुनासक्तं स्तन्यपं व्याधिपीडितं ॥६०॥ न हंतव्यो मृगो राज्ञा मृगी च शिशुनावृता ॥ अथवा धर्ममुत्सृज्य २

मां हनिष्यसि मानद ॥ ६१॥ बालकानि गृहे मुक्त्वा सखीनांच निवेद्यवै ॥ शपथैरागमिष्यामि व्याध शृणु वचो मम ॥ ६२॥ या स्वभर्तार मुत्सृज्य पर पुंसि रता सदा
॥ तस्याः पापेन लिप्यामि यदि नायामि ते गृहं ॥ ६३॥ व्याधेन तेन सा मुक्ता गत्वा वै निज मंदिरे व्याधोपि तच्चरं त्यक्त्वा प्रस्थितः स्व गृहं प्रति ६४ सर्वेषां
वचनं ध्यायन मृगाणां सत्यवादिनां ॥ एतेषां वधको नित्य महं यास्यामि कां गतिं ॥ ६५॥ स्वाश्रमं चाशु संप्राप्ता यत्र त द्धरिणी द्वयं ॥ सर्वाः समेता एकत्र मरणे कृत
निश्चयाः ॥ ६६॥ परस्परं प्रजल्पंतो लुब्धकस्य विचेष्टितं ॥ मृगउवाच ॥ मयात त्रैव गंतव्यं यत्र व्याधस्य मंदिरं ॥ ६७॥ सत्येतु पालनीयं स्यात् सत्ये धर्मे प्रतिष्ठिताः
॥ एतच्छ्रुत्वा तु सा भार्या मृगं प्रति वचोब्रवीत् ॥ ६८॥ वय मप्यागमिष्यामिस्त्वया सार्धं मृगोत्तम ॥ अस्माकं मरणं श्लाघ्यं भर्त्रा सह सदा प्रभो ॥ ६९॥ एवं विकल्प्य
ताः सर्वा मरणे कृत निश्चयाः ॥ खानं पानं परित्यज्य मैथुनं भोगमेवच ॥ ७०॥ अनाशन व्रतं गृह्य हृष्ट लग्ना ययुस्तदा ॥ भार्या पुत्रैः परिवृतो मृगस्तं देशमागमत् ॥
७१॥ क्षुधितो बालकैर्युक्तो लुब्धको यत्र तिष्ठति ॥ पालयन् सत्यवाक्यानि लुब्धकं वाक्य मब्रवीत् ॥ ७२॥ मृगउवाच ॥ हन मां प्रथमं व्याध पश्चादेतान् क्रमेण तु
॥ बालकानि ततः पश्चाद्धन्य सा मा विलंबय ॥ ७३॥ एतच्छ्रुत्वा तु वचनं मृगेण परिभाषितम् ॥ आत्मानं निंदयित्वा तु लुब्धको वाक्य मब्रवीत् ॥ ७४॥ लुब्धक उ-
वाच ॥ गच्छ गच्छ मृगश्रेष्ठ कुटुम्बेन समन्वितः ॥ त्वं गुरुर्मम धर्मेषु उपदेष्टा त्वमेव हि ॥ ७५॥ मया भग्नानि शस्त्राणि त्यक्तं मायादिकं बलं ॥ कस्य भार्या सु-
ताः कस्य कुटुंबं कस्य कीदृशं ॥ ७६॥ तेभ्यस्त्वंकमे भुंजीत मृग गच्छ यथा सुखं ॥ एतस्मिन्नंतरे चैव देव दुंदुभयो नदत् ॥ ७७॥ आकाशात् पुष्पवृष्टिश्च पपात

शिवरात्रि
३

सुमनोहरा॥ देवदुताः समायाता विमानं गृह्यशोभनम्॥७८॥देवदूता ऊचुः॥ अहो व्याध महासत्व सर्वे सत्वभयंकर॥ विमान मिदमारुह्य सदेहः स्वर्गमाविश॥७९
॥ मृगराज महासत्व भार्यासमन्वित॥ भार्या द्वि।तय संयुक्त नक्षत्र पदमाप्नु हि॥८०॥एतच्छ्रुत्वा तत्सर्वं लुब्धकेन समन्वितः॥विमानं च समारुह्य नक्षत्रपदमागतः॥
८१॥ बालकद्वितयं चाग्रे तृतीया पृष्ठतो मृगी॥पृष्ठतस्तस्य वै प्राप्ता मृगशीर्षस्य संनिधौ॥८२॥ मृग नाम्ना तु नक्षत्रं दृश्यते ह्यापि व्योमगं॥उपवासं करिष्यंति जागरे कथा
ण समन्वितम्॥८३॥ यथोक्तं शास्त्र मार्गेण तेषां मोक्षो न संशयः॥शिवरात्रि समं नास्ति व्रतं पापभयापहं॥८४॥यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः॥८५॥

इति श्रीशिवपुराणे शिवरात्रिव्रतकथा समाप्ता ॥ शुभं भूयात् ॥ श्री शंकरः शरणम् ॥ श्रीगुरुभ्यो नमः ॥

इदं संतोपाव्ह दामोदरात्मज सखारामेण लिखितम् मि० फाल्गुन वद्य ४ बुधवार संवत १९९६ शाके १८६१ ता० २७ मार्च १९४०

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 39.59
Date 22.3.68
SIMLA